अयोध्याविन्शतिका

اجودھیابن ستکا

मुक्तिप्रदसप्तपुर्य्येकाग्रगण्यकौशलामहत्त्वविकाशिका

श्रीमत्पण्डितधुरीणाविद्यान्धतमोपहैकमार्त्तण्डाशेषाघौघविनाशनैकभास्करस्वकीर्त्याधवली

कृतसकलदिगन्तश्रीमद्रामभद्रगुरुमित्रसमासन्निपाश्रयनामोमापतिनिर्मिता

श्रीमद्रामचरणाब्जपरागमधुकरश्रीपण्डितराजिविभूषितरामचरणकृतव्याख्यासहिता

अतिशुद्धतया

लक्ष्मणपुरे

नवलकिशोरमुद्राक्षरयन्त्रालये मुद्रिता

अगस्त सन् १८८२ ई०

श्रीगणेशायनमः॥ आशीर्वादसहस्राणि सन्तु श्रीरामचर्म्मणे विद्वियोदिंशतिका सर्वेषां बोधसिद्धये १ यद्योगा
दितिसायोध्या अनिशं विजयते यद्योगात्यट्टपुरःकाश्यादयो मुक्तेःनिश्चयेनामृतस्य मोक्षस्य प्रदाः कीदृ
शाः संस्थाः सन्निधन्तोऽमरा यासु ताः अध्ययने श्रुतिश्रुतादीनामुक्तबाधिका अध्ययनेन प्रशंसाप्रतिपादके
न चोक्ता सा तत्र हेतुमाह श्रीरामरूपा अतएव वसिष्ठसंहितायामुक्तम् सच्चिदानन्दरूपेयं रामरूपैव ना-
जनइति सर्वासु श्रीरामसम्बन्धेनास्या अपि तद्रूप सम्बन्धः स्फुटः सर्वसम्बन्धोपायमाह सर्वेभ्य इति परत

श्रीगणेशायनमः यद्योगानन्तके ऽमृत प्रदतरास्संस्थामराश्च ट्टपुरः सायोध्याऽध्ययनोक्त
रा विजयते श्रीरामरूपानिशम्॥ सर्वेभ्योऽथमहेश्वरः परतरः श्रीरामतस्तारकं जप्त्वाऽयाच
तथान्मुना मृतमथि श्रीकाशि तत्सद्द्यगम् १

इति सर्वतः परतरो ब्रह्मा तत्परतरो हरिः तत्परतरो रुद्रस्तन्मे मनः शिवसंकल्पमस्त्विति श्रुतेः एतादृ
शो महेश्वरोऽधिकाशि काश्यां श्रीरामस्य तारकं जप्त्वा श्रीरामतो मृता नाम मृत मयाचत तत्तार्वां स
नगरीनिष्ठम् बोध्यमितिशेषःअयमभावः महेश्वरस्य सर्वपरतत्वेन स्वत एव मुक्तिदातृत्वौचित्यायाचनोचि
त्यालया कारणेनामृतस्य श्रीरामाधीनत्वबोधना द्रामाभिन्नायोध्याधीनत्वस्यापि सत्वनाद चायाधीनत्वा
भ्युपगमेऽन्यतस्वतन्त्रतया तत्कारणे विरोधात्सर्वत्रै वैपागति रेतदेव वक्ष्यतीर्थमित्यादिना ॥२॥ ॥१॥

दृष्टमिति स्थालीपुलाकपदेन तद्धनशिथिलतण्डुलग्रहणं स एव प्रणः प्रतिज्ञानं यस्मिंस्तादृशं सर्वपरीक्षणमित्यम् एतादृशपरीक्षणेनैव व्यवहारो भवति तदेवाह कृतपणमिति कृतः पणो यस्मिन् इति सर्वमहेश्वरीयनगरीत्वज्ञासिद्धम् तथा श्रीहरेः नगरीत्वमित्यनुवर्तते तत्र हेतुमाह तयोर्हरिहरयोर्भेदस्य नरकदस्यापगमात्ययाग हरिनगरीष्वपि तथा व्यवस्थेति भावः व्यवस्थाभेदे तयोर्भेदस्य दुर्वारतया नरकापत्तिर्दुर्वारेति बोध्यम् तदुक्तम् विष्णुरुद्रान्तरं यस्तु यः श्रीगौर्यन्तरं तथा ब्रूते तस्य हि मूर्खस्य वाक्यं शास्त्रवि-

दृष्टं सर्वपरीक्षणं कृतपणं स्थालीपुलाकप्रणं सिद्धं सर्वमहेश्वरीयनगरीत्वं तथा
श्रीहरेः॥ भेदस्यापगमात्तयोर्न्नरकदस्यायान्यथा प्रोच्यतेऽयोध्यारामपुरी तथाथ मथु-
रा तद्भुजा तत्करी २

गर्हितम्॥ विष्णुरुद्रान्तरं यस्तु यो ब्रूते मूढधीस्तु सः नरकेषु समस्तेषु यातनासु पतत्यध इति अथान्यथा प्रकारान्तरेण प्रोच्यतेऽयोध्यासम्बन्धः अयोध्या रामपुरी तथा मुक्तिकरी तत्र मुक्तौ सम्बन्धः सिद्ध एव साक्षात् अथ मथुरा तद्भुजा श्रीशत्रुघ्ननिर्मिता तद्वदयोध्यावत्तत्करी मुक्तिकरीत्यर्थः एकपितृजातभ्रात्रोरभेदेन तत्सम्बन्धः स्फुट एवेति भावः २ २ २ २ २ २

अन्यापि द्वारवत्यपि अन्या मुक्तिदातृत्वात् कुशो रामज इति आत्मा वै जायते पुत्र इति श्रुतेः [illegible]
भेदः स्पष्ट एव अन्योप कुशजन्याप्युत्त [illegible] आह प्राधान्यादिति परो न हि चोद्यर्थ [illegible]
ती सागरी या सागरे भवा अयोध्याधिपतिसगरसन्ताननिर्मितत्वात् [illegible] यथा [illegible]
नदितिहेतुरुक्तो प्राग्वः हेतुर्वचना अद्धेति प्रसिद्धो अमूर्तेर्मोक्षैः पिनद्धिका [illegible] शङ्कयया मु
क्तिमञ्चते प्राप्नोति तत्र मुनेभ्यो ददातीति यावत् स तस्या ईशो [illegible] रदराजतिनाम्नो राम एव

अन्याप्यत्र कुशस्थलीति विदिता अन्या कुशो रामजः प्राधान्यादिह [illegible] पः [illegible]
दर्शयापि [illegible] तदर्योभया बुधजना अद्यापि तद्दामूर्तेः काञ्च्यात्मुक्तिसीराकप
या रामः सनामन्तरात् ३ तत्स्वामी वरदेश्वरो हि विदितो भामी न कामी गृधो द्विर्न्नो रा

एवञ्च रामसम्बन्धस्फुट एवेति भावः ३ तदेवानुवदति तत्स्वामीति विष्णुकाञ्चीस्वामी वरदेश्वरो नर
दराजः [illegible] राजा श्रीराम एव कामक्रोधलोभान्विनार्थ्यमिलपितदातृत्वात् भामी क्रोधी का
मी गृधो लोभी न याचकगतो कदापि द्विर्द्विवारं नराति ददाति एकदा दानेनैव तदैश्वर्याधिकाया
चकताया अभावादिति भावः मक्रोधादिभ्यन्यः श्रीराघवः एव वरदराज इत्यर्थः तदुक्तमभियुक्तैः कांचि

कचित्पृथुकतण्डुलाः कचिच्छाकपर्णाशनं कचित्प्रमितताचभूरभून्नरत्नैरेस्तुच्छ्ये अयम्विनिमयो महानिहावतारा न्तरे न सोऽस्ति रघुनन्दने प्रणतिमात्रराज्यप्रद इति तेन लोभाभावः स्पुटः काम क्रोधाभावो विदित एव अत- एव वरदत्वम् तस्यवस्याभावे हेत्वन्तरमाह दिन्सेति दाने व्ययभयाद्व्याकुलतापरेषाम् एतस्य तु दानार्थ मेव व्याकुलत्वम् असै न दत्तम् कस्मै किन्देयमद्य नरत्नमित्यादिरूपम् अत एव प्रपीनं पुष्कलं यशो य-

ति कदापि याचकमसौ श्रीराघवः सोऽप्यसः॥ दित्साव्याकुलितः प्रपीनसुयशाः कुत्साविहीनः सदा दीनस्याथनुदं विलीनमनसः सद्यस्समुत्तारयेत् ४ नाप्यस्सन्ति पराणि सन्ति भुवने तीर्थानि भोमुक्तेर्नैव पराणि सन्ति विमलामाहे फलानि कचित् ॥

स्य सः सदा कुत्साविहीनः स्वकर्मिकान्यकर्तृका स्वकर्तृकान्यकर्मिका वा सा नास्ति कुत्साराहित्येन द- यापि सूचिता तदाह दीनस्येति विलीनमनसो दीनस्य सद्यस्तुदं समुत्तारयेदित्यन्वयः स्वस्मिन्नावेशद्वासनाम वाञ्छा मनोलयो बोध्यः तेन वरदत्वावश्यकता बोधिता ४ अत एवास्य सर्वपरत्वमित्याह नाप्यद्गनि ग्नाभ्यः सप्तभ्यः पुरीभ्यः पराण्यन्यानि तीर्थानि तन्न्येभ्यस्तीर्थानि तरणपादानानि तीर्थानि सन्ति स-

मीचीनानि न सन्ति सुवन इत्यन्वयः अन्येषामवमत्वे हेतुमाह मुनेः परागि क्वचिदपि विमलानि फलानि न सन्ति नश्वरत्वादिति भावः तदेवाह सत्त्वानीयमिति सतां ज्ञानिनामप्यभक्तिमतीनत्वानीयमानमिकाम्फलमन्तिमञ्चतुर्षु फलेषु तदनन्तन्नित्यम् अन्येषांत्रिवर्गाकांक्षिणामनन्तानि पूर्वाणि सान्तान्यनित्यान्यतस्त्वायमानि सन्ति फलानि तीर्थानि यद्विशयात्संशयात्फलभक्ता किमिदं नित्यं वा फलं दास्यतीति

सत्त्वानीयमनन्तमन्तिमफलं सान्तान्यनन्तानितान्यन्येषामवतानि सन्ति विशया सा
विचारो स्वयम् ५ स्वातन्त्र्यादितरत्र मुक्तिरति चेत्सप्रत्स्वपि स्यात्तथा चिन्त्येतरतन्त्र
ताभ्युपगता तन्त्रेषु सा स्यात्कृथा ॥

सः नन इतरेषाममवत्वमात्राज्जोत्तमत्वमिति तत्सम्बन्धफलमिति विचारयसार इति बोध्यम् ५ एतत्सम्बन्धमन्नतैव परंत्रामृतमिति मतन्दूषयति५स्वातंत्र्यादिति तन्त्रेषु पुराणादिषु आर्षत्वात्त्वम् सा इतरतंत्रता ततत स्मात् सेत्यनुवर्त्तते सा कथा सर्वत्र बुधैर्बोध्या पवित्रः सुपन्था यस्यां सा पवित्रसुपथा श्रीरामसम्बन्धः पवित्रत्वं च श्रीरामस्य सर्वापेक्षपुण्यकारणविश्रागनशालित्वात् अत एव सत्कथो निष्पापको यस्यां सा

कथनं कथः कविधानं चतुर्थे सत्परिपाकत्वं श्रीरामसत्कथैनमंसंसंशयमस्त्यत्वात् मयाधिपा कथितापरन्निग माहात्म्या न यतो न वाह्या ततो न गर्ह्या यतो न गर्ह्या ततो ग्राह्येत्यर्थः मन्वन्तर सहस्रन्तु जजाप वृषभ ध्वज इति मणिकर्णिकायां यो म्रियेत स विमुच्येतेति सदाशिवप्रार्थना पञ्चक्रोश्यां यो म्रियेत सो विमुच्येतेति तापनीयकथा ततोऽवधार्या ६ तदेवाह रामस्येति अथर्वोक्तया अथर्वणिकतापनीयोक्तया मुक्तौ

तत्सर्वत्रकथापवित्र सुपथा बोध्या वुधैः सत्कथा वाह्यानो विगमाद्धि पात्रकथिता ग्रा-
ह्यान गर्ह्या यतः ६ रामस्यार्थनया महेशकृतया मुक्तावथर्वोक्तया नादित्वञ्च पर-
त्वमुक्तमिहसद्धन्यं सुमान्यं श्रिये ॥

महेशकृतया रामस्यार्थनया पावनया श्रीरामस्यानादित्वं परत्वं सर्वावतारित्वञ्चोक्तम् श्रियै कल्याणायइह जगति सत्परं धन्यमतः परमपरं धन्यं नेति भावः ततो विमत्स्यपक्षिविधैर्विबुधैर्भूर्वैः स्वर्देवैश्च शश्वत्सदा सुमान्यं सुपूज्यम् अनुधैर्मान्सर्य्यादिशन्यैः श्रीमद्बुधैः सत्परिडितैश्चेत्यर्थः एवञ्चवेदवाह्यत्वा भावस्फुट स्वेति वोध्यम् ननु परत्वे विषाणकथाविरुध्यते त्याह शुक्तद्गति काकः काकः पिकः पिक

द्युतिकर्मयोगः तथाच शुक्लत्वेनाभिमतद्रव्यर्थोल्लक्षणयेन्दुदेश्यतावच्छेदकविधेयतावच्छेदकयोर्भेदाभा-
वस्तथाच शुक्लोऽपि शुक्लः शुक्लतरोऽपि शुक्लः द्युतिवद्विष्णुरपि विष्णुर्महाविष्णुरपि विष्णुरिति कथया-
स्य विष्णुत्वमपि सदैव महाविष्णुत्वादिति ७ तदेवाह वेद्यमित्यादिना अस्य श्रीरामस्य महाविष्णुत्व-
मेव सत् तत्र वेद्यं वेदवेद्यम् तदुक्तमगस्त्यसंहितायाम् वेदवेद्ये परे पुंसि जाते दशरथात्मजे वेदः प्रा

शश्वत्तद्धि विधैर्विमृश्य विबुधैः श्रीमद्बुधैरच्युतैः शुक्लः शुक्लतरोऽपि शुक्ल द्युति
वद्विष्णुत्वमप्यस्य सत् ७ वेद्यं हृद्यमवद्यभिन्नमसु महाविष्णुत्वमेवास्य सत् चेन्नहै
किकलीलयात्मसमया प्रासीनयापीनया ॥

चेतसोदासीनत्वात् श्रीरामायणात्मनेति हृद्यं हृदयस्य प्रियमीश्वराणामपि अत एवावद्यभिन्नमनवद्य
मनिन्द्यमिति यावत् ७ इति वितर्के तर्कान्तरं आह चेदिति यदि तन्महाविष्णुत्वम्पीनया पुष्टयात्म
कालङ्घासीनयैका दशसहस्रसंख्याकवर्षस्थितया दशवर्षसहस्राणि दशशतानि चेत्युक्तेः लीलया लौ
कोत्तरयाप्रतत्वमनन्तरं विष्णुत्वमेव परमिदं नेति शेषश्चेच्छन्दवलादिति भावः चेदेवं स्यात्कथं

अ॰ वि॰ महो मन्त्रेश्वरः सर्वजीवकल्याणकारि राघवीगमप्रवर्तकः शिवो मन्वन्तराणां सहस्रं रामस्य मनुं कथं
८ जजाप तदुक्तं तापनीये मन्वन्तरसहस्रैस्तु जजाप वृषभध्वज इति अयंभावः परमेश्वरस्य सर्वज्ञत्वादिना
वास्तवविष्णुत्वेनैवोपासनौचित्यात् मत्स्याद्यकालिकत्वे नावास्तवात्कथं तथा चरितं तन्नोचित
मनौचित्यात्पर हतत्त्वेन तेन मन्ये श्रीरामो महाविष्णुरेवेति ॥८॥ अथासुरविमोहिनी मायया श्रीरामा

विष्णुत्वविष्णुत्वन्तदनन्तरं कथं महो मन्वन्तराणां शिवः साहस्रं प्रजजापतारकमनुं
रामस्य मन्त्रेश्वरः ॥९॥ न ह्यस्यासुरमोहिनी समुचिता माया महेशस्य सा माधुर्य्ये
हि विराजते न तु सदैश्वर्य्ये कथञ्चित्प्रभोः॥

चरितं विपिने वैमनस्यादि वदिदमिति तन्निराकरोति नहीति अस्य महेश्वरस्यासुरविमोहिनी माया नहि स-
मुचिता सा माया माधुर्य्ये हि विराजते अवधारणो हि शब्दः तत्फलितनिषेधमनुवदति नत्विति प्रभोः सदैश्व-
र्य्ये कथञ्चिदपि न तु विराजते किन्तु समताया विष्णुना प्रसिद्धेः शिवस्य तदुपासनन्त स्वार्थं न तन्नोचितम् श्री
१ रामस्य सूभयमुचितं जिष्णुत्वाद्धि स्तुत्वान्वेत्याह श्रीशम्भोर्विष्णुना समतापि सम्भवति विष्णुरुद्रान्तांशत्वयः

अ. वि. श्रीगौर्य्यन्तरं तथा ब्रूते तस्यहि मूर्खस्य वाक्यं शास्त्रविगर्हितम् विष्णु रुद्रान्तरं यश्चयो ब्रूते मूढधीस्तुसः नरके-
१० षु समस्तेषु यातनासु पतत्यधः तुलसी मञ्जरी भिर्यः कुर्य्याद्धरि हरार्चनम् नरलोकं समासाद्यन भूयस्तनयो
भवेत् यो विष्णु रुद्र एवासौ यो रुद्रो विधिरेवसः त्रयाणां भेद कृत्पापी नरके परिपच्यते इत्यादि पुराणा द्य-
स्यौऽभयोरेका प्रकृतिः प्रत्ययभेदाद्भिन्नवज्ज्ञाति कलयति कश्चिन्मूढो हरिहर भेदं विनाशास्त्रम् इ-

श्रीशाम्भोः समताधि सम्भवति सा श्री विष्णु ना जिष्णु ना नाने नाथ सह प्रनाथ नवतः
कार्या महा विष्णु ना॥८॥ शाम्भो राधन साधनं प्रकुरुते माधुर्य्य एवा निशान्तस्थै प्रत्य
र्थ्यमथा कलप्य मधुरः प्रीत्यारुचे राघवः॥

त्यपि युक्त.वाक्येन समता प्रसिद्धैव एवज्ज्वतेन समतास्तु अर्थानेन महाविष्णु ना जिष्णु ना रामेण सह प्रनाथ
नवतः प्रयाचन वतः श्रीशाम्भोः सा समता न कार्य्येत्यन्वयः महा विष्णु त्वन्त्व स्योक्त मेवेति बोध्यम्॥८॥ ननु
तर्हि महा विष्णुः श्रीरामः शाम्भो रुधासनं कथं कुरुत इत्याह शाम्भो रिति राघवः प्रीत्यारुचेऽप्य शाम्भो राधनं ।

नित्योपासनं साधनं नैमित्तिकं पुरश्चर्य्यादि रूपं माधुर्य्य एव प्रकुरुते सेतौ रामेश्वर नामक शिवलिङ्ग स्थापन प्रसिद्ध मेव अत एव शम्भोः प्रीत्यै यो मया: कारि धर्म्मः स्वे स्वे काले माननीयो भवद्भिः नाना वर्णान भाविनो भूमिपालान भूयो भूयो याचते रामचन्द्र इति दक्षिणा दिशि तत्सुद्धाङ्गि तताम्र पत्र प्रसिद्धिः श्रुताः स्वयंच मधुरो माधुर्य्य प्रियो नत्वैश्वर्य्य प्रियः अत एवोक्तं वाल्मीकीये यद ब्रवी न्मान्नर लोक सत्कृतः पिता महात्मा विबुधाधिपो यमः तदेव मन्येय रमात्मनो हितं न सर्व लोकेश्वर भाव मव्ययमिति अथा नि-

सुखं सख्यमपि स्वसौख्यद महो तातादि सम्बन्धवत्ते मस्थे मसुमन्त्रतन्त्र पुरुष:
श्रीमान्स्वतन्त्रः परः॥१०॥

शान्तस्य श्री शम्भोरैश्वर्य्यस्य रपेक्षया परमाकलय्य विधार्य्य सख्यमपि प्रकुरुते तत्कीदृशं सुखं सर्व साधनेषु प्रधानं स्वसौख्यदम अत एवोक्तं तत्र मित्र भावेन संप्राप्त नत्यजेयं कथं चनेति किम्वत् तादि सम्बन्धवत् स्वरूच्यैव पितृत्व गुरुत्वाद्यरी करोति भवति च स श्रीमान सर्व प्रशस्त नित्य लक्ष्मी सम्पन्न परः स्वतन्त्रो महा स्ववशी परन्तु प्रेम्णास्थे मय प्रिमन्नेवं यत्सु मन्त्राणां तत्तन्त्रस्त द्वशी भूतः सचासौ पुरुषश्चेति ॥१०॥

॥

श्रीरामे विभुत्वमप्रकारान्तरेण साधयेत् श्रीविभुत्वमिति किञ्च प्रपञ्चावने जगत्पालनार्थे क्षिति सुती-व विभुत्वमञ्चति विभु भाव माकारं धर्मञ्च प्राप्नोति सैव पुरुषाकारतया मसबनं करोतीति भावः अत एवाह सुरचनेति शोभन रचनवती अनेन प्रकृति द्वारा सृष्टि कर्तृत्व मपि ध्वनितम् अत एव श्रीरा-मानुजाचार्य्यैण मन्त्रार्थ व्याख्या या मागमीय वचनं लिखितम् सा सर्व जगतां नेत्री सीता विभुस्वरू-पिणी यस्याः कटाक्ष मात्रेण मूल प्रकृति सम्भव इति नेत्री नापि का स्वामिनीति यावत् अत एवाभिदधा

श्री विभुत्व मथाञ्चति क्षिति सुता किञ्च प्रपञ्चावने काञ्ची सञ्चित शोभना सुर-
चना श्री काञ्चनश्रीः परा॥ तन्त्रैयन्त्रित वाम तो नियमतो माहात्म्य तो भेद भिन्नाने ना
प्यतयो र्मुनीश भणितो विभुत्वमप्याश्रितम् ॥ ११ ॥

तितन्त्रैयन्त्रि तेति काञ्च्यासञ्चितं संस्थापितं शोभा यस्या इति श्री काञ्चनस्य जाम्बूनदादेः श्रीरिव श्रीर्यस्या इति विशेषणाद्वयं शोभार्थम् परा सर्वतः कारणा कारणत्वादिति भावः अत एवाह नियमतो माहात्म्यत इति प-रत्वे हेतुः तथा च शक्ति शक्तिमतोरभेदात्यत्या अर्द्धाङ्गि त्वस्य प्रसिद्धे स्तयोः श्रीजनक नन्दिनी श्री रघुनन्दन-योः प्रकरणा द्बुद्धिस्थ त्वाद्भेद भिन्नाने नाभेदेन मुनीश भणितो वाल्मीकीये विभुत्वमप्याश्रितमिति सम्बन्धः॥११॥

प्रकारान्तरेण परत्वमभिदधाति विष्णोरिति अगस्त्यमुनिमुखात् स्वयमेव श्रीरामेण श्रीवायुसूनोर्युद्धक
र्मविष्णोरप्यधिकं कथितम् तदुक्तं वाल्मीकीये नहीन्द्रस्य न रुद्रस्य न विष्णोर्वित्तपस्य च तानि
कर्माणि श्रूयन्ते यानि युद्धे हनूमत इति नहीदमसंभावनाभिमुख्याधूलम् वाल्मीकीये तदभावात् तदुक्तं
तत्रैव ब्रह्मप्रसादवाक्यतः नते वागनृता काव्ये काचिदत्र भविष्यतीति श्रीरामस्य तु परत्वं नास्त्यं

विष्णोरप्यधियुद्धकर्म कथितं श्रीवायुसूनोः स्वयं वाक्येक्वापि प्रतिश्रुते कथि-
तवानिन्द्रो महेन्द्रः कविः॥ विष्णुस्तत्र परेण कथ्यत इति श्रीरामचन्द्रः परः
स्पष्टः कष्टहरः प्रपन्नसुवरः सत्याध्वरः श्रीकरः १२

कथ्यते मयेति वाक्यान्तरेण परत्वं प्रतिपादयति वाक्यइति वाक्यप्रतिश्रुते क्वापि कविरादिकविरिन्द्रो महे
न्द्रइति कथितवान् इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्तो युधि रामवध्यमिति तत्र परेण महेन्द्र इ-
ति पदेन विष्णुः कथ्यते सुरनायक इन्द्र इत्यनेन सख्या इतिसिद्धस्तेन तस्य परत्वे इति हेतोः श्रीराम
चन्द्रः स्पष्टएव परः कीदृशः कष्टहरो जनानाम् यतः प्रपन्नसुवरः श्रीकरः ऐश्वर्य सम्पादकः सत्याध्वरः
सत्यमध्वरो यस्यसः एतेन तदुक्तावनृतत्वोत्प्रेक्षानप्रेक्षणीया सदभ्योहितस्तन्यस्तादृशोऽध्वरोयस्यसत्यादायामध्व-

रो यस्य सः १२ प्रकारान्तरेण परत्वमाह कुण्डल्यामिति यस्य कुण्डल्यामेतादृशी ग्रहमण्डली निपति
ता ज्योतिःशास्त्रमेव प्रतिपदिकात्वेन बलं येषु ज्योतिःशास्त्रेषु बलं येषां वा तानि नैर्विमलैः फलैर्मण्डि
ता नीचैः फलैः केपि न खण्डिता परं कुण्डल्या शुभफलानि नरफलखण्डितान्यपि भवन्ति न तथात्र त
था चैतादृशी कुण्डली नावतारेण न चावतारेषु विदिता तस्माच्छ्रीरामभद्रोऽमरो देवो मनोहरतरः सर्वपर

कुण्डल्यां ग्रहमण्डली निपतिता यस्योत्तमैर्मण्डिता ज्योतिःशास्त्रबलैः
फलैश्च विमलैर्नीचैः फलैः खण्डिता ॥ नक्कापीन्यवतारेण प्रविदिता
नोवावतारेषु सा तस्मात्सर्वपरो मनोहरतरः श्रीरामभद्रोऽमरः १२ देष्टा
रोहि भवन्ति दुष्टनिकरस्यायावतारास्तमे तेषां निग्रहणं भवेन्न हकचित्ते
षां समत्वाद्यदि ॥

त्यर्थः १३ पुनः प्रकारान्तरेण परत्वमभिदधाति देष्टारइति अथसमे सर्वेऽवतार दुष्टनिकरस्य देष्टा
रः सन्तः संहारका भवन्ति तेषामवताराणां निग्रहणं परस्परमितिशेषः कहचिन्न भवेत कुतस्तत्र हे
तुमाह तेषां समत्वादवतारत्वात् यदिकश्चिदवतारेणवतारस्य निग्रहस्यात्तर्हितन्कर्तरि निग्रहकर्त्तरि

तिजुषां वेदसेविनां भर्त्तरि विदांतदृज्ञानिनां सर्वेश्वरत्वं मतम् अथ रामविनिग्रहान्मत्सुखमदण्डनात् ॥ श्रुतिजुषां विदां रामेऽवतारित्वधीरेवेत्यर्थः २४ पुनः प्रकारान्तरेण तत्त्वमभिदधाति तत्त्वमिति सतां सारग्राहिणां सुमतं तत्त्वं सिद्धान्तो मया निगदितं धर्म्माङ्कुतं शर्म्मणा नत् यद्वा अङ्कुतं शर्म्म स्वतद्रूपं तत्त्वम् सच्छ्रुतम् सद्भ्यो महद्भ्यो वेदेभ्यो वा श्रुतम् न स्वकपोलकल्पितम् इदंतत्त्वं सारदुग्धोधनमिव ॥

स्या कर्त्तरि भर्त्तरि श्रुतिजुषामद्वावरिन्त्वधी रामे रामविनिग्रहाद्यमतं सर्वे
श्वरत्वम्विदाम् २४ तत्त्वं सत्सुमतं मया निगदितं धर्म्माङ्कुतं सारंस्वमवश्य
मेव सुहृदो गृह्णन्तु सन्तोद्रुतम् ॥

रस्यमास्वादनीयमवश्यमेव सुहृदः सन्तो द्रुतं त्वरितमेव गृह्णन्तु कालविलम्बनायोग्यत्वात् किन्तदाह श्रीनवः श्रिया सर्वोत्तरया क्षणे क्षणे नवयाः नवः क्षणे क्षणे नवः क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयताया इत्युक्तेः ताहृशः श्रीराघवः सर्वतः परतरात्सौन्दर्य्यादपि परतरः सौन्दर्य्यपरतत्वहेतुमाह वने तद्विहारे तद्दर्शनेन तन्नत्यानां मुनानाम्मोहात् सुवेषपुरुषदर्शनेन वनितानां ॥

मोह: स्तुत: सुवेषं पुरुषं दृष्ट्वा भ्रातरं पितरं सुतम् क्लिद्यन्ते योनय: स्त्रीणामित्युक्तेः ननु मुनीनाम् किं वि
योऽक्लिन्नं मुनीनामत इत्युक्तेः वनद्वन्द्वुके रामरावणद्वन्द्वगाद्यभावोऽध्वनितः अतएव धन्योमान्यतमानामी
श्वरः मुनीनां मोहे मानं पद्मपुराण वचनम् पुरामहर्षयः सर्वे दण्डकारण्यवासिनः दृष्ट्वा रामं हरिं त
त्र भोक्तुमैच्छन्सुविग्रहम् तेसर्वेस्त्रीत्वमापन्नास्समुद्भूतास्तु गोकुले कामेन हरिणं संप्राप्य तेतेमुक्ता-

सौन्दर्यादपि सर्वत: परतरा मोहान्मुनीनां वने धन्यो मानतमेश्वर: पर
तर: श्रीराघव: श्रीनव: १५ गुप्त्या स्वस्य विहारसारकरणो योऽध्यास्यस
र्वामृतास्पदं तस्य परत्वपीश्वरतान्यत्र काप्यश्रुते: ॥

भवार्णवादिति १५ पुन: प्रकारान्तरेणाह गुप्त्येति गुप्तविहारे सारत्वं प्रकृतपदार्थ दर्शनाभावात्तस्य वि
योगे: योऽध्याध्यासिनामनन्तदु:खभिया सर्वेभ्योऽमृतवितरणान्दिव्यरूपकरणे नेत्युक्तम योऽध्यास्य सर्वामृ
तादिति तस्य श्रीरामस्य परत्वं स्पष्टम् अन्यत्र कापीश्वरतौ तद्व्यापारे तच्छ्रुते: सर्वामृतवितरणा
श्रवणात् साकेतनिकेतनानां दु:खेन स्वस्य दु:खान्तसुखेन सुखायकृतिवैचित्र्यं चरद्यावत्वं तत: प

त्वं स्ववियोगे दुःखातिशयत्वं सर्वेभूतदानोचित्यञ्चानुवदतिकिञ्चेति अस्य श्रीरामस्य प्रकानेहेनोत्त
त्वं परत्वम् कीदृशस्य विचित्रप्रकृतेः विचित्रा प्रकाशाच कातिव्यापारो यस्य तस्य तेनैव सम्भूत
वितरणं द्योतितम् प्राहेवेतिगुणत्वाभावः आहच नदेव अयोध्यास्थे तने सुखदुःखयोः समत्वं त
जनसमत्वं सुखे सुखित्वं दुःखे दुःखित्वम् तस्मिन्वरद्ये नयोः सुखदुःख यो र्लेखनात् वाल्मीकी

किञ्चास्य प्रकृते विचित्रप्रकृतेस्तत्वं समत्वं जनैः योध्यास्थे सुखदुःखयो
र्वरद्ये तस्मिंस्तयोर्लेखनात् ९६ दोषान्वेषणमन्तरेण सुहृदो संतोषणं
पोषणं हानं नैव कदापि तापहरणं दानञ्च राज्यश्रियः॥

ये चरितम् व्यसनेषु मनुष्याणां भृशम्भवति दुःखितः अथाप्यभ्युदये तेषाम्पितेव परितुष्यतीति ९६
अथ गुणविशेषेण विशेषं वर्णयिति दोषे किन्दोषदर्शनविनैव सुहृदां सन्तोषणं पोषणं कदापि
हानं नैव राज्यश्रियो दानत्वतापहरणं शश्वत सर्वदा सुहृदां योनेर्निरीक्षणं नैव चीवरेण वान
१८ रेण रात्रिचभिक्षानामस्ति नैव सर्वाजनस्वस्त्वाने तदर्थम् एतादृशाचरणे तस्योत्साहो जायते अत

स्र.विं. एवानुसरणं सदा प्रोक्षणं करस्पर्शेन तदङ्गरजोमार्जनम् यस्यैवमाचरणन्तस्य विलक्षणं तस्य वि
१८ लक्षणस्य सर्वपरस्य सद्गुणं को वर्णयेत्कोपि नवाङ्मनसा गोचरत्वात् १७ विलक्षणगुणान्तरे
ण वैलक्षणं लक्षयति दोषेति केनचिद्दोषेण विक्षेपादिना यदि सुहृन्मां विस्मरति तदाप्येवं
स्मृत्वा सुगतिं न यामीति एष मम स्वभावः तदुक्तम् यदि वातादिदोषेणामद्भक्तो मान्न संस्मरेत् ॥

योनैर्नैव निरीक्षणं स्मरणकाते ऽथानुसरणं प्रोक्षणं शाश्वत्तस्य विलक्षणं
निपुणकः सद्गुणं वर्णयेत् १७ दोषेणाप्यथ केनचिद्यदि सुहृन्मां वि
स्मरत्यास्वहं तंस्मृत्वा परमां नयामि सुगतिं ह्येषस्वभावो मम ॥ ईदृग्य
स्य सदैव शुद्धनियते रुद्द्रघोक्षणं शोषणं सेवासान्मनः ऽनमोबुधजनाः क
स्तद्गुणं वर्णयेत् १८

अहं स्मरामि तं नित्यं नयामि परमां गतिमिति शुद्धा नियतिर्नियमो यस्य तस्येदृक् सदैवोद्घोष
णं सेवासान्मनसः सेवाधीनमानसस्यानसः शोकस्य शोषणं हे बुधजनाः कस्तद्गुणान्वर्णयेदित्य
र्थः ऽन ऽक्लीवन्नसेशोक मान स्यन्दनयोरपीतिकोशः १८ १८ १८ १८

गुणान्तरेण वैलक्षण्य वर्णयति येत्यादि हे श्रीमन् लक्ष्मीवन् सरस्वतीवन् श्रीश्चते लक्ष्मीश्चते पत्न्याविति श्रुतेः श्रीः सरस्वत्यपि यद्वाश्रशैश्वर्य्यवन् श्रीरामस्य सम्बोधनान् प्रसन्नाः सुहृदो यस्य तस्य यस्यैवं नियमः येजनाः सकृदेवैकवारमेव प्रसन्नाः शरणागता जातास्ते वयमिति शेषः इत्यर्थनपरा याचनतत्परास्ते यो भूतेभ्यो ह्यभयस्य प्रदाने त्वरति अथो तस्यत्ते पुरुषस्य सतां गुणानां गाने को ह्यति कृपणो दीन तरस्तत्र हेतुः।

यस्यैवं नियमः प्रसन्नसुहृदो जाताः प्रसन्ना जनाः श्रीमन्ये सकृते वशेऽर्थन
परास्तेभ्यः प्रदाने त्वरा ॥ भूते पुरुषस्याथो गुणानां सतां स्याद्गाने निपुणोऽहि
कोऽति कृपणोऽनेहः परागस्तव्रणाः १९ यस्तुष्येत्कथमप्यणोद्भवनखस्वैं
कोपहान्या प्रभुः यश्चान स्मरति स्वतन्त्रकृतिनोऽनन्तापकारं क्वचित् ॥

स्वरण आधिव्याधिः सव्रणसहितः अनेहः परः कालव्यवहारवांस्तदधीन इति यावत् निपुणः कुशलीस्यात्कोपि नेति भाव १९ पुनः प्रकारान्तरेण वर्णयति यस्त्विति अथयः पुरुषः कथमपि केनापि प्रकारेण कचित्कचिदपि उद्भवतीत्युद्भवोद्भूता नवा नवीना पूर्वास्तस्य योऽपहृतिस्तया तुष्येत् पश्चात्तनन्तापकारं स्वतन्त्रप्रकृतिनः

स्वाधीनस्वभाववान्नस्मरतिरतः प्रभुः समर्थो मनोवशीकरणात् अहोऽआश्चर्य्यं तस्य सद्गुणं कोवर्णयेत्कोपि
नतस्य कीदृशस्यैवम्प्रकृतेः पवित्रविहृतेः पवित्रविहारस्य शम्वद्भृतेर्निरन्तरधैर्य्यवतः सन्ततेः सन्नीकृतिः किय
यस्य तस्य देवस्य विहारशीलस्य गुणं कीदृशमद्भुतमागमैर्नुतमिति शिवम् २० अथ कविविंशतिका मुभ-
य नामिकां स्तौति श्रीमदिति श्रीमती सदैश्वर्य्यसम्पन्ना विविचित्रा मतिर्य्यस्यां सा मिष्टं मधुरं दधाति ताद-

तस्यैव प्रकृतेः पवित्रविहृतेः शश्वद्धृतेः सन्ततेर्देवस्याद्भुतमागमैर्न्नुत
महो कस्सद्गुणं वर्णयेत् २० श्रीमद्राजकुमारमारपरमाविक्कारकारप्रभोः
श्रीमद्राम ललाम नाम कविभोः सद्भद्रचन्द्रस्य सा ॥ मित्रश्रीगुरुमादृमा
पतिव्राता सद्भिस्नुता संश्रिता श्रीमद्विंशतिका विचित्रमतिकास्यादिष्टदा मि

ष्टधा २१

ष्टदास्याद्वरद भवेदिति सम्बन्धः किंसम्बंधिनीत्याकांक्षायामाह श्रीमदिति श्रीमद्राम इति ललामं रमणी-
यं भुक्तिमुक्ति तदद्वारकसुस्वाददायिनाम यस्य स्वासौ त्रिभुवनन्तकोटिब्रह्माण्डयाऽस्थावरजङ्गमसकल
 प्रत्यक्षानुक्षणसमीक्षकतस्य सद्भद्रस्य परकल्याणरूपस्य चन्द्रस्य सवाह्लादकस्य श्रीमद्राजकुमारश्चासौ मा

सू॰ विं॰ २१

स्य परमायाः शोभाया धिक्कारं करोति ताहृशस्य प्रभोः सर्वस्वामिनः स्तुत्यस्तावक भावसम्बंधे षष्ठी सास्तादिका भिन्नोल्यत्रापि तदनुवृत्त्या सम्बन्धान्तरकल्पनयान्वयः भिन्नः श्रीगुरुः सत्सुखस्वरूपः परमात्मनाभिन्नः श्रुति शिरसिद्धान्तात् गुरुर्ब्रह्मा गुरुर्विष्णुरित्यागमोक्तेश्च स चासावुमापतिश्च तन्नामक विस्तृतज्ञानमिति तेदं

इतिश्रीमन्महामहामहीपकुमारमारकोटिपरमाजयकारश्रीमद्रामभद्र गुरुमित्रसभामन्त्रि पाठ्युपनामोमापतिशर्म्मनिर्म्मित श्रीमन्नन्तुविंश तिकाश्रीमद्रसिकाजनतासज्जनिकाख्यान १ चतुर्विंशतियुताङ्कशशांकमित वत्सरे ज्येष्ठश्रेष्ठदलाष्टम्यामङ्कितास्तुतिरङ्गुता २१

श्रितेतिसम्बन्धः आलस्यात्पदानामपर्यन्तरकल्पनाभाववर्णनाप्रमाणान्तरप्रतिपादनाभावेनेति शिवम् स्तुत न्व वन्दनास्यास्तुतिमद्विंशतिका सती मता विवृतिः प्रमिताय तद्धितकविना शर्म्मभृता सुनिर्म्मिता ॥ २१ ॥

इतिश्रीमन्महामहामहीपकुमारमारपरमाधिक्कारकारश्रीमद्रामभद्रगुरुमित्रसमासन्निपाठ्युपनामोमापतिश र्मनिर्मितस्वनिर्म्मितनद्विंशतिकाविवृतिशर्म्मदाभूयात् २१ २१ २१ २१